# Pradosha Stotrashtakam

# પ્રદોષસ્તોત્રાષ્ટકમ્

## Document Information

Text title : pradoShastotrAShTakam

File name : pradosha8.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : skandapurANa

Latest update : January 01, 2005, August 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2022

*sanskritdocuments.org*

Pradosha Stotrashtakam

# પ્રદોષસ્તોત્રાષ્ટકમ્

શ્રી ગણેશાય નમઃ ।

સત્યં બ્રવીમિ પરલોકહિતં બ્રવીમિ
સારં બ્રવીમ્યુપનિષદ્ધૃદયં બ્રવીમિ ।
સંસારમુલ્બણમસારમવાપ્ય જન્તોઃ
સારોઽયમીશ્વરપદામ્બુરુહસ્ય સેવા ॥ ૧॥

યે નાર્ચયન્તિ ગિરિશં સમયે પ્રદોષે
યે નાર્ચિતં શિવમપિ પ્રણમન્તિ ચાન્યે ।
એતત્કથાં શ્રુતિપુટૈર્ન પિબન્તિ મૂઢાસ્તે
જન્મજન્મસુ ભવન્તિ નરા દરિદ્રાઃ ॥ ૨॥

યે વૈ પ્રદોષસમયે પરમેશ્વરસ્ય,
કુર્વન્ત્યનન્યમનસોઽઙ્ઘ્રિસરોજપૂજામ્ ।
નિત્યં પ્રવૃદ્ધધનધાન્યકલત્રપુત્રસૌભાગ્ય-
સમ્પદધિકાસ્ત ઇહૈવ લોકે ॥ ૩॥

કૈલાસશૈલભુવને ત્રિજગજ્જનિત્રીં ગૌરીં
નિવેશ્ય કનકાચિતરત્નપીઠે ।
નૃત્યં વિધાતુમભિવાઞ્છતિ શૂલપાણૌ
દેવાઃ પ્રદોષસમયે નુ ભજન્તિ સર્વે ॥ ૪॥

વાગ્દેવી ધૃતવલ્લકી શતમખો વેણું દધત્પદ્મજ-
સ્તાલોન્નિદ્રકરો રમા ભગવતી ગેયપ્રયોગાન્વિતા ।
વિષ્ણુઃ સાન્દ્રમૃદઙ્ગવાદનપટુર્દેવાઃ સમન્તાત્સ્થિતાઃ
સેવન્તે તમનુ પ્રદોષસમયે દેવં મૃડાનીપતિમ્ ॥ ૫॥

ગન્ધર્વયક્ષપતગોરગસિદ્ધસાધ્ય-
વિદ્યાધરામરવરાપ્સરસાં ગણાંશ્ચ ।
યેઽન્યે ત્રિલોકનિલયા સહભૂતવર્ગાઃ

પ્રાપ્તે પ્રદોષસમયે હરપાર્શ્વસંસ્થાઃ ॥ ૬॥

અતઃ પ્રદોષે શિવ એક એવ
પૂજ્યોઽથ નાન્યે હરિપદ્મજાદ્યાઃ ।
તસ્મિન્મહેશે વિધિનેજ્યમાને
સર્વે પ્રસીદન્તિ સુરાધિનાથાઃ ॥ ૭॥

એષ તે તનયઃ પૂર્વજન્મનિ બ્રાહ્મણોત્તમઃ ।
પ્રતિગ્રહૈર્વયો નિન્યે ન દાનાદ્યૈઃ સુકર્મભિઃ ॥ ૮॥

અતો દારિદ્ર્યમાપન્નઃ પુત્રસ્તે દ્વિજભામિનિ ।
તદ્દોષપરિહારાર્થં શરણાં યાતુ શઙ્કરમ્ ॥ ૯॥

॥ ઇતિ શ્રીસ્કાન્દોક્તં પ્રદોષસ્તોત્રાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Pradosha Stotrashtakam*
pdf was typeset on August 14, 2022

Please send corrections to *sanskrit@cheerful.com*